॥ अनन्तपूजापद्धतिः ॥

प्रातर्नद्यादिके स्नात्वा नित्यकर्म समाप्य च। अनन्तं हृदये कृत्वा शुचिस्तत्र समाहितः ॥ अव्रणं कलशं चैव वस्त्रयुग्मेन वेष्टितम्। मुष्टिमात्रेण दर्भैस्तु फणिराजं च कारयेत् ॥ स्थापयेत्कलशस्याग्रे जगदाधारमव्ययम्। आराधयेदनन्तं च तस्मिन् कुम्भे 22

44

विशेषतः ॥ गोचर्ममात्रमालिप्य गोमयेन विचक्षणः। तन्मध्ये स्थण्डिलं कृत्वा पद्ममष्टदलं लिखेत् ॥ तस्योपरि न्यसेत्कुम्भं चूतपल्लवसंयुतम्। प्राणायामं ततः कृत्वा पूजाञ्च परिकल्पयेत् ॥ द्विराचम्य। देशकालौ सङ्कीर्त्य ॥ एवंगुणविशेषण विशिष्टायां शुभतिथौ (अस्माकं सकुटुम्बानां क्षेमस्थैर्यविजयायुरारोग्यैश्वर्याभिवृद्धिसत्सन्तानचिरकाल सौभाग्य सिद्धि – चिन्तितमनोभीष्टसिद्धिद्वारा) भारतीरमणमुख्यप्राणान्तर्गत श्रीअनन्तपद्मनाभ-प्रेरणया० प्रीत्यर्थं श्रीअनन्तपद्मनाभस्य यथाशक्ति आवाहनादि षोडशोपचारपूजां करिष्ये ॥ (कलश दिपूजां कृत्वा) अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरश्शुचिः ॥ इति शङ्खतोयेन पूजाद्रव्याणि आत्मानञ्च प्रोक्ष्य, यमुनां पूजयेत् ॥

श्रीमदनन्तपूजाङ्ग यमुनापूजां करिष्ये ॥ लोकपालस्तुतां देवीमिन्द्रनीलसमप्रभाम्। यमुने त्वामहं ध्याये सर्वकामार्थसिद्धये ॥ श्रीयमुनायै नमः ध्यायामि ॥ ओं इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये

18

शृणुह्या सुषोमया ॥ सरस्वति नमस्तुभ्यं सर्वकामप्रदायिनि । आगच्छ देवि यमुने व्रतसंपूर्तिहेतवे ॥ श्रीयमुनायै नमः अस्मिन्कलशे यमुनामावाहयामि ॥ सिंहासनसमारूढे देवशक्तिसमन्विते । सर्वलक्षणसंपूर्णे यमुनायै नमोस्तु ते ॥ आसनं समर्पयामि ॥ रुद्रपादे नमस्तुभ्यं सर्वलोकहितप्रिये । सर्वपापप्रशमनि तरङ्गिण्यै नमोऽस्तु ते ॥ पाद्यं समर्पयामि ॥ तार्क्ष्यपादे नमस्तुभ्यं शङ्करप्रियभामिनि । सर्वकामप्रदे देवि यमुने ते नमो नमः ॥ अर्घ्यं समर्पयामि ॥ विष्णुपादोद्भवे देवि सर्वाभरणभूषिते । कृष्णमूर्ते महादेवि कृष्णवेण्यै नमोस्तु ते ॥ आचमनीयं स० ॥ सर्वपापहरे देवि विश्वस्य प्रियदर्शिनि । सौभाग्यं यमुने देहि यमुनायै नमोऽस्तु ते ॥ मधुपर्कं स० ॥ नन्दिपादे महादेवि शङ्करार्धशरीरिणि सर्वलोकहिते देवि भीमरथ्यै नमोऽस्तु ते ॥ पञ्चामृतस्नानम् ० ॥ सिंहपादोद्भवे देवि नारसिंह समप्रभे । सर्वलक्षणसंपूर्णे भवनाशिनि ते नमः ॥ शुद्धोदकस्नानम्० ॥ स्नानानन्तरं आचमनीयं स० ॥ विष्णुपादाब्जसंभूते गङ्गे त्रिपथगामिनि । सर्वपापहरे देवि भागीरथ्यै नमोऽस्तु ते ॥ वस्त्रयुग्मं स० ॥ त्र्यंबकजटोद्भूते गौतमस्याघनाशिनि । सप्तधा सागरं याति गोदावरि

नमोऽस्तु ते ॥ कंचुकं समर्प० ॥ सुवर्णभूषितं दिव्यं नानारत्नसुशोभितम् । त्रैलोक्य-पूजिते देवि गृहाणाभरणं शुभम् ॥ आभरणानि समर्प० ॥ कर्पूरागरुकस्तूरीरोचनादिभि-रन्वितम् । गन्धं दास्याम्यहं देवि प्रीत्यर्थं प्रतिगृह्यताम् ॥ गन्धं स० ॥ श्वेतांश्च चन्द्रवर्णाभान् हरिद्रारागरञ्जितान् । अक्षतांश्च सरिच्छ्रेष्ठे ददामि यमुने शुभे ॥ अक्षतान्समर्पयामि ॥ कण्ठसूत्रं तालपत्रं हरिद्राकुंकुमांजनम् । सिन्दूरादि प्रदास्यामि सौभाग्यं देहि मेऽव्यये ॥ सौभाग्यद्रव्यं स० ॥ केतकीजाजिपुन्नागैश्चम्पकैर्वकुलैश्शुभैः । पूजयामि च देवेशि यमुने भक्तवत्सले ॥ पुष्पाणि समर्पयामि ॥ अथाङ्गपूजा ॥ चञ्चलायै नमः पादौ पूजयामि ॥ चपलायै नमः गुल्फौ पूजयामि । गिरिजायै नमः जङ्घे० । लोकवन्दितायै० जानुनी पूज० ॥ पीताम्बरधरायै० ऊरू० । भक्तवत्सलायै० कटिं० । परायै० नाभिं पूजयामि । कालिन्द्यै० गुह्यं० । गौर्यै० उदरम्० । कुम्भस्तन्यै० स्तनौ पूजयामि । अघहंत्र्यै नमः भुजौ० । रक्तकण्ठ्यै कण्ठं० । सुमुखायै० मुखम्० । भागीरथ्यै० ओष्ठौ० । सुनासिकायै० नासिकां पूजयामि । उत्पलाक्ष्यै० नेत्रे० । ताटङ्कधारिण्यै० कर्णौ० । तुङ्गायै० ललाटं० । भद्रायै० शिरः० ।

यमुनायै नमः सर्वाङ्गं पूजयामि ॥ दशाङ्गं गुग्गुलोपेतं सुगन्धं च मनोहरम् । धूपं दास्यामि यमुने कृपया त्वं गृहाण तम् । धूपमाघ्रापयामि ॥ घृताक्तवर्तिसंयुक्तमन्धकारविनाशकम् । दीपं दास्यामि ते देवि गृहाण मुदिता भव ॥ दीपं दर्शयामि ॥ नैवेद्यं षड्रसोपेतं दधिमध्वाज्यसंयुतम् । नानाभक्ष्यफलोपेतं गृहाणाभीष्टदायिनि । नैवेद्यं समर्पयामि ॥ घनसारसुगन्धेन मिश्रितं पुष्पवासितम् । पानीयं गृह्यतां देवि शीतलं सुमनोहरम् ॥ मध्ये पानीयं समर्पयामि ॥ हस्तप्रक्षालनं० मुखप्रक्षालनं० आचमनं० बीजपूराम्रपनस खर्जूरीकदलीफलं । नारिकेलफलं दिव्यं गृहाण सुरपूजिते ॥ नानाविधफलानि समर्पयामि । पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् । कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलं समर्पयामि ॥ सुवर्णं सर्वधातूनां श्रेष्ठं देवि च तत्सदा । भक्त्या ददामि वरदे स्वर्ण वृष्टिं च देहि मे ॥ सुवर्णपुष्पदक्षिणां समर्पयामि ॥ नीराजनं सुमङ्गल्यं कर्पूरेण समन्वितम् । वह्निचन्द्रार्कसदृशं गृहाण दुरितापहे ॥ महानीराजनं समर्पयामि ॥ नमस्ते सर्वलोकानां जनन्यै पुण्यमूर्तये । नमस्ते देवि कल्याणि नमस्ते मुनिपूजिते ॥ मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

छत्रचामरदर्पणनृत्तगीतवाद्यांदोळिकादि समस्तराजोपचारान्समर्पयामि ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्ति प्रदक्षिणपदेपदे ॥ प्रदक्षिणं सम० । नमस्ते लोकजननि नमस्ते लोकवन्दिते । नमस्तेस्तु महादेवि त्राहि मां दुःख सागरात् ॥ नमस्कारान्सम० ॥ करिष्यामि व्रतं देवि त्वद्भक्त्या त्वत्परायणः । वाञ्छितं देहि मे नित्यं हरौ भक्तिमचञ्चलाम् ॥ इति प्रार्थना ॥ यस्य स्मृत्या च० अनेन यमुना पूजनेन भगवान् यमुनान्तर्गतभारतीरमणमुख्यप्राणान्तर्गत श्रीविष्णुः प्रीयताम् ॥

अथ अनन्तपूजा ॥ यमुनाकलशोपरि सप्तफणान्वितं दर्भमयं अनन्तं संस्थाप्य, प्राणप्रतिष्ठां कुर्यात् ॥ अस्मिन्पुस्तके ३-पुटे १२-पङ्क्तौ (अस्य श्री प्राणप्रतिष्ठामन्त्रस्येत्यारभ्य, ४ पुटे १ पङ्क्तौ स्वस्ति ॥) इत्यंतमुक्त्वा, मूलमन्त्रं जपित्वा, ओं भूः अनन्तं आवाहयामि । ओं भुवः अनन्तं आवाहयामि । ओं स्वः अनन्तं आवाहयामि । ओं भूर्भुवस्स्वः अनन्तं आवाहयामि ॥ आवाहितो भव, स्थापितो भव, सन्निहितो भव, सन्निरुद्धो भव, अवकुण्ठितो भव, सुप्रसन्नो भव, वरदो भव, शान्तो भव, प्रसीद प्रसीद ॥

अथ ध्यानम् ॥ कृत्वा दर्भमयं देवं परिधानसमन्वितम् । फणसप्तान्वितं देवं पिङ्गलाक्षं चतुर्भुजम् ॥ दक्षिणाग्रकरे पद्मं शङ्खं तस्याप्यधःकरे । चक्रमूर्ध्वकरे वामे गदां तस्याप्यधःकरे ॥ दधानं सर्वलोकेशं सर्वाभरणभूषितम् । नवाम्रपल्लवाभासं पिङ्गलभ्रूसुलोचनम् ॥ अव्ययं सर्वलोकेशं पीताम्बरधरं हरिम् । अलंकृतं समुद्रेण तत्स्वरूपं विचिन्तयेत् ॥ मूलमन्त्रेण अनन्तं ध्यायेत् ॥ इति ध्यानम् ॥ आगच्छानन्त देवेश तेजोराशे जगत्पते । इमां मया कृतां पूजां गृहाण सुरसत्तम ॥ सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् ॥ आवाहयामि ॥ तस्याग्रतो दृढं सूत्रं कुङ्कुमाक्तं सुदोरकम् । चतुर्दश ग्रन्थियुक्तमुपकल्प्य प्रपूजयेत् ॥ नूतनदोरस्थापनम् ॥ अनन्तं नारसिंहञ्च विष्णुं कृष्णं हरिं शिवम् । ब्रह्माणं भास्करं शेषं सर्वव्यापिनमीश्वरम् । विश्वरूपं महाकायं सृष्टिस्थित्यन्तकारकम् । एभिर्नामपदैर्दिव्यैः चतुर्दशसु ग्रन्थिषु प्रत्येकं सम्स्थाप्य देवतामावाहयेत् ॥ प्रथमग्रन्थौ अनन्तमावाहयामि । द्वितीयग्रन्थौ नारसिंहमावाहयामि । तृतीयग्रन्थौ विष्णुमावाहयामि । चतुर्थग्रन्थौ कृष्णमावाहयामि । पञ्चमग्रन्थौ हरिमावाहयामि । षष्ठग्रन्थौ शिवमावाहयामि ।

सप्तमग्रन्थौ ब्रह्माणमावाहयामि । अष्टमग्रन्थौ भास्करमावाहयामि । नवमग्रन्थौ शेष० । दशमग्रन्थौ सर्वव्यापिनमावाहयामि । एकादशग्रन्थौ ईश्वर० । द्वादशग्रन्थौ विश्वरूप० । त्रयोदशग्रन्थौ महाकाय० । चतुर्दशग्रन्थौ सृष्टिस्थित्यन्तकारकमावाहयामि ॥ अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः । रत्नसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यतां ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ आसनं समर्पयामि ॥ कुरुष्व मे दयां देव संसारार्तिभयापह । पाद्यं गृहाण देवेश नमस्ते विश्वभावन ॥ एतावानस्य महिमाऽतो ज्यायांश्च पुरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि । पाद्यं० ॥ अनन्तानन्त देवेश अनन्तफलदायक । अनन्तानन्तरूपोऽसि गृहाणार्घ्यं जनार्दन । त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रामत्साशनानशने अभि । अर्घ्यं० ॥ गङ्गोदकं समानीतं सुवर्णकलशे स्थितम् । आचम्यतां हृषीकेश प्रसीद पुरुषोत्तम ॥ तस्माद्विराळजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः ॥ आचमनीयं समर्पयामि ॥ दामोदर नमस्तुभ्यं दधिक्षौद्रसमन्वितम् । मधुपर्कं गृहाण

त्वं मया दत्तं सुरेश्वर ॥ मधुपर्कं सम० ॥ दधिक्षीरघृतोपेतं शर्करामधुसंयुतम् । पञ्चामृतञ्च देवेश स्वीकुरुष्व दयानिधे ॥ पञ्चामृतस्नानं सम० ॥ कर्पूरैलाकुङ्कुमादिसुगन्धिद्रव्यसंयुतम् । गङ्गोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः ॥ शुद्धोदकस्नानं समर्पयामि ॥ स्नानानन्तरम् आचमनीयं स० ॥ नमस्ते ज्ञानरूपाय ज्ञानगम्याय ते नमः । पीताम्बरयुगं दिव्यं गृहाण ज्ञानिवल्लभ ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ वस्त्रयुग्मं० ॥ यज्ञोपवीतं परमं सौवर्णं सुमनोहरम् । गृहाणानन्त देवेश लोकानुग्रहविग्रह ॥ तस्माद्यज्ञात्सर्वहुतस्संभृतं पृषदाज्यम् । पशूँस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ यज्ञोपवीतं समर्पयामि । हारकङ्कणकेयूरमुद्रिकाकुण्डलानि च । गृहाणान्यानि दिव्यानि भूषणानि रमापते ॥ आभरणानि० ॥ चन्दनागरुकस्तूरी घनसारसमन्वितम् । गन्धं गृहाण गोविन्द सर्वगन्धमनोहर ॥ तस्माद्यज्ञात्सर्वहुत ऋचस्सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ गन्धं समर्पयामि ॥ अक्षतान्धवळान्शुद्धान्दृष्टिप्रियकरान्

शुभान् । रक्ताक्षतांश्च दास्यामि गृहाण मधुसूदन ॥ अक्षतान् समर्पयामि ॥ मालतीमल्लिका पुष्पैः केतकीचम्पकादिभिः । कोमलैस्तुलसीबिल्वैरर्चयामि रमापते ॥ तस्मादश्वा अजायन्त ये केचोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ पुष्पाणि समर्पयामि ॥

अथाङ्गपूजा ॥ श्रीमदनन्तपद्मनाभाय नमः पादौ पूजयामि ॥ सङ्कर्षणाय नमः गुल्फौ पूजयामि ॥ कालात्मने नमः जानुनी पूज० ॥ त्रिविक्रमाय नमः ऊरू० ॥ विश्वरूपाय० कटिम्० । विष्णवे० गुह्यम्० । पद्मनाभाय नाभिम्० । परमात्मने० हृदयम्० । दामोदराय० उदरम्० । श्रीवत्सलांछनाय० वक्षःस्थलम्० । सर्वास्त्रधारिणे० बाहून्० । श्रीकण्ठाय नमः कण्ठम्० । वाचस्पतये० मुखम् । गोविन्दाय० नासिकाम् । कपिलाय० चक्षुषी पूजयामि । रत्नकुण्डलधराय० कर्णौ० । केशवाय० ललाटम्० । हृषीकेशाय० केशान्० । सहस्रशिरसे० शिरः० । सर्वात्मने नमः सर्वाण्यङ्गानि पूजयामि ॥ अथ केशवादिनामपूजा ॥ ओं केशवाय नमः ।० श्रीकृष्णाय नमः । मत्स्याय नमः । कूर्माय नमः । वराहाय नमः । नारसिंहाय नमः । वामनाय नमः । भार्गवाय नमः । रामाय नमः । कृष्णाय नमः ।

बुद्धाय नमः । कल्किने नमः ॥ नानाविधपुष्पाणि समर्पयामि ॥ अथ ग्रन्थिपूजा ॥

अनन्ताय नमः प्रथमग्रन्थिं पूजयामि । नारसिंहाय० द्वितीयग्रन्थिम्० । विष्णवे नमः तृतीयग्रन्थिम् । कृष्णाय० चतुर्थग्रन्थिम् । हरये० पञ्चमग्रन्थिम् । शिवाय० षष्ठग्रन्थिम् । ब्रह्मणे० सप्तमग्रन्थिम्० । भास्कराय० अष्टमग्रन्थिम् । शेषाय० नवमग्रन्थिम्० । सर्वव्यापिने नमः दशमग्रन्थिम्० । ईश्वराय० एकादशग्रन्थिम्० । विश्वरूपाय द्वादशग्रन्थिम्० । महाकायाय नमः त्रयोदशग्रन्थिम्० । सृष्टिस्थित्यन्तकारकाय नमः चतुर्दशग्रन्थिं पूजयामि ॥

दशाङ्गं गुग्गुलोपेतं धूपश्चातिमनोहरम् । कपिलाघृतसम्युक्तं गृहाण पुरुषोत्तम ॥ यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ धूपमाघ्रापयामि ॥ साज्यं त्रिवर्तिसम्युक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ दीपं दर्शयामि ॥ नानाभक्ष्यैश्च भोज्यैश्च रसैष्षड्भिस्समन्वितम् । लेह्यपेयादियुक्तञ्च नैवेद्यमुपभुज्यताम् ॥ चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायत ।

मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ मूलमन्त्रमष्टोत्तरशतवारं जपेत् ॥ नैवेद्यं समर्पयामि ॥ पानीयं पावनं श्रेष्ठं गङ्गादिसरिदुद्भवम् । प्राशनार्थं मया दत्तं देवेश प्रतिगृह्यताम् ॥ पानीयं सम० ॥ उत्तरापोशनम् ॥ हस्तप्रक्षालनम् ॥ मुखप्रक्षालनम् ॥ आचमनीयम् ॥ बीजपूराम्रपनसखर्जूरीकदलीफलम् । नारिकेलफलं दिव्यं गृहाणाभीष्टदायक ॥ नानाविध-फलानि० ॥ पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् । कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रति-गृह्यताम् ॥ ताम्बूलम्० ॥ हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः । अनन्तपुण्यफलदमत-श्शान्ति प्रयच्छ मे ॥ सुवर्णपुष्पदक्षिणाम्० ॥ चन्द्रादित्यौ तथा तारा विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ । श्रिय एवैनं तच्छ्रियमादधाति संततमृचा वषट्कृत्यं संतत्यै सन्धीयते प्रजया पशुभिर्य एवं वेद ॥ महानीराजनम् समर्प० ॥ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव तंसंप्रश्नं भुवनायन्त्यन्या ॥ मन्त्रपुष्पाञ्जलिं० ॥

छत्रचामरव्यजनदर्पणनृत्तगीतवाद्यांदोलिकादिसमस्तराजोपचारान्समर्पयामि ॥ यानि कानिच पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिणपदेपदे । नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशश्श्रोत्रात्तथा लोकां अकल्पयन ॥ प्रदक्षिणं समर्पयामि ॥ नमस्ते सर्वनागेन्द्र नमस्ते मधुसूदन । नमस्ते भगवन्भूयो नमस्ते धरणीधर ॥ सप्तास्यासन्परिधयस्त्रिस्सप्तसमिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ नमस्कारान्सम० ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमा न्यासन् । तेहनाकं महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ मन्त्रपुष्पाञ्जलिं० ॥ दारिद्र्यनाशनार्थाय पुत्रपौत्रप्रवृद्धये । अनन्ताख्यमिदं सूत्रं धारयाम्यहमुत्तमम् ॥ दोर-ग्रहणम् ॥ अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव । अनन्तरूपिन् विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥ दोरनमस्कारः ॥ संसारगह्वरगुहासु सुखं विहर्तुं वांछन्ति ये कुरुकुलोद्भव शुद्धसत्वाः ॥ संपूज्य च त्रिभुवनेशमनन्तरूपं बध्नन्ति दक्षिणकरे वरदोरकं ते ॥ इति दोरबन्धनम् ॥ नमस्सर्वहितानन्त जगदानन्दकारक । जीर्णदोरममुं देव विसृजे

अहं त्वदाज्ञया ॥ इति जीर्णदोरविसर्जनम् ॥ यस्य स्मृत्याच० परिपूर्णं तदस्तु मे ॥ अनेन श्रीअनन्तपद्मनाभपूजनेन भगवान् भारतीरमणमुख्यप्राणान्तर्गत श्रीमदनन्तपद्मनाभः प्रीयताम् ॥ श्रीकृष्णार्पणमस्तु ॥ ततः ब्राह्मणपूजां कृत्वा वायनदानं दद्यात् ॥ वायन-दानमन्त्रः ॥ अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च । अनन्तस्तारको द्वाभ्यां अनन्ताय नमो नमः ॥ इदं वायनदानं सदक्षिणाकं सताम्बूलं भारतीरमणमुख्यप्राणान्तर्गत श्रीमदनन्त पद्मनाभप्रीतिं कामयमानस्तुभ्यमहं संप्रददे न मम ॥ प्रतिगृह्यताम् ॥ (ब्राह्मणः प्रतिगृह्णामीति वदेत्) ॥ इति अनन्तपूजापद्धतिः ॥